यथासंख्येन एकैकस्मिन्नेकमेवाधिपतिं विदधे। तस्य ह वा एते श्लोकाः।
"प्रियव्रतकृतं कर्म्म कोऽनुकुर्य्याद्विनेश्वरम्।
यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्तवारिधीन्॥"
छायां घ्नन् तमो निरस्यन्।
"भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः॥"
एवं पितरि संप्रवृत्ते तदनुशासने वर्त्तमान आग्नीध्रो जम्बुद्वीपौकसः प्रजा औरसवद्धर्म्मावेक्षमाणः पर्य्यगोपायत्। तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्व्वचित्तिं नामाप्सरसमभियापयामास। तस्यामु ह वात्मजान् स राजवर्य्य आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यक-हिरण्मय-कुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्त्रानजनयत्। आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाविभागं जम्बुद्वीपवर्षाणि बुभुजुः। यान्यत्र नव वर्षाणि नवयोजनसहस्रायामानि अष्टभिर्मर्य्यादागिरिभिः सुविभक्तानि भवन्ति। एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोड़शसाहस्रं तावतान्तर्भूम्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एवाह्रसन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते। भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः। एतासामपो भारत्यः प्रजानामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति। चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयुरोघवती सप्तवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्व्येण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्च भवति॥ १॥ *॥ अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। प्लक्षो जम्बुप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वस्तं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं वयसं सुभद्रं शान्तं क्षेममम्तमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णा आङ्गिरसी सावित्री सुभाता ऋतम्भरा सत्यम्भरेति महानद्यः॥ २॥ *॥ प्लक्षस्तु समानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते। यत्र ह वै शाल्मली प्लक्षायामा। तद्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमभिज्ञातमिति। तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः। सुरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमती सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति॥ ३॥ *॥ एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्व्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्यापनो ज्वलन इवापरः सुशष्परोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्त्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत्। वसुवसुदानदृढ़रुचिनाभिगुप्तसत्यव्रतविप्रनामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तैव। बभ्रुश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति॥ ४॥*॥ तथा बहिः क्रौञ्चद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपक्लृप्तः। वृतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौञ्चनामा पर्व्वतराजो द्वीपनामनिर्व्वर्त्तक आस्ते। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्त्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम। आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपवर्हणो नन्दो नन्दनः सर्व्वतोभद्र इति। अभया अमृतौघा आर्य्यका तीर्थवती रूपवती पवित्रवती शुक्लेति॥५॥*॥ एवं परस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन दधिमण्डोदेन परीतः। यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य हि महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्त्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश। एतेषां वर्षमर्य्यादागिरयो नद्यश्च सप्त सप्तैव। ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोता देवपालो महानस इति। अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रश्रुतिर्निजधृतिरिति॥६॥*॥ एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपक्लृप्तः समानेन स्वादूदकेन समुद्रेण बहिरावृतः। तद्द्वीपमध्ये मानसोत्तरनामैक एवार्व्वाचीनपराचीनवर्षयोर्मर्य्यादाचलः अयुतयोजनोच्छ्रायायामः। यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानाम्। यदुपरिष्टात् सूर्य्यरथस्य मेरुं परिक्रामतः संवत्सरात्मकं चक्रं देवाहोरात्राभ्यां परिभ्रमति। तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकनामानौ वर्षपती नियुज्य स्वयं पूर्व्वजवद्भगवत्कर्म्मशील आस्ते। तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति॥ ७॥ इति श्रीभागवते ५ स्कन्धे १। २। १६। १९। २० अध्यायाः॥ *॥ अपि च।
"कन्ये द्वे दश पुत्त्राश्च सम्राट् कुक्षिश्च ते उभे।
ते सर्व्वे भ्रातरः शूराः प्रजापतिसमा दश॥
अग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्व्वपुः।
ज्योतिष्मान् द्युतिमान् हव्यः सवनो मित्र एव वा।
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः।
जातिस्मरा महाभागा न राज्याय मनो दधुः॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान्।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम्॥
पुष्कराधिपतिश्चैव सवनं कृतवान् सुतम्।
महावीतो धातकिश्च पुष्कराधिपतेः सुतौ॥
द्विधा कृत्वा ततो वर्षं पुष्करे स न्यवेशयत्।
हव्यस्य पुत्त्राः सप्तासन्नामतस्तान्निबोध मे॥
जलदश्च कुमारश्च सुकुमारो मणीवकः।